# Sati Ranikakritam Krishnanarayana Stotram

# સતી રાણિકાકૃતં કૃષ્ણનારાયણસ્તોત્રમ્

## Document Information

Text title : Sati Ranikakritam Krishnanarayana Stotram

File name : satIrANikAkRRitaMkRRiShNanArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 2 | adhyAya 267/52-77||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# સતી રાણિકાકૃતં કૃષ્ણનારાયણસ્તોત્રમ્

સતીં સત્યં પ્રતુષ્ટાવ તદા કૃષ્ણનરાયણમ્ ।
સત્યાઃ સત્યં નિત્યસત્યં નારાયણં નમામ્યહમ્ ॥ ૫૨॥

ૐ નમો બ્રહ્મસવિત્રે સત્યાનાથાય તે નમઃ ।
પાતિવ્રત્યસ્વરૂપાય પઞ્ચાગ્નયે ચ તે નમઃ ॥ ૫૩॥

ત્રેતાગ્નયે બીજસ્વરૂપાય ચ તે નમઃ ।
ગર્ભરૂપાય બાલ્યાય યુવરૂપાય તે નમઃ ॥ ૫૪॥

કાન્તાયૈ ચાપિ કાન્તાય સવંશાય ચ તે નમઃ ।
યુગલાય સ્થવિરાય ચ્યાત્મકાય ચ તે નમઃ ॥ ૫૫॥

નમો ભગવતે કૃષ્ણ ભગવત્યૈ ચ તે નમઃ ।
શીલરૂપાય ધર્માય ધર્મલાભાય ચ તે નમઃ ॥ ૫૬॥

નમશ્ચિતાસ્વરૂપાય પતિરૂપાય તે નમઃ ।
નમઃ પાન્થસ્ય સાર્થાયાઽતિવાહિકાયૈ તે નમઃ ॥ ૫૭॥

નમઃ સૂર્યાય મેઘાય વિદ્યુતે શશિને નમઃ ।
નમો દિવાસ્વરૂપાય નિશારૂપાય તે નમઃ ॥ ૫૮॥

અયનદ્વયરૂપાય નમો યુગપ્રવર્તિને ।
નમો દિવાય સત્યાય નમો વૈકુણ્ઠવાસિને ॥ ૫૯॥

સતીનાં પતયે કૃષ્ણ સતીલોકેશિને નમઃ ।
નમો ગોલોકકાન્તાય નમોઽક્ષરનિવાસિને ॥ ૬૦॥

નમો મુક્તપ્રપૂજ્યાય સતાં ચ પતયે નમઃ ।
મુક્તેશ્વરેશાય બ્રહ્મપ્રિયેશ તે નમઃ ॥ ૬૧॥

નમો માણિક્યમુક્તાનાં રમાયાઃ પતયે નમઃ ।
પદ્માવતીસતીલક્ષ્મીરાધાશ્રીપતયે નમઃ ॥ ૬૨॥

સર્વેશાય પરેશાય નમઃ શ્રીપરમાત્મને ।
લક્ષ્મીશાય નમઃ શ્રીપુરુષોત્તમાય તે નમઃ ॥ ૬૩॥

અનાદિશ્રીકૃષ્ણનારાયણાય સ્વામિને નમઃ ।
અન્તર્યામિસ્વરૂપાય સયુજે તે નમો નમઃ ॥ ૬૪॥

ગોપાલનન્દનાયેશ કમ્ભરાજાય તે નમઃ ।
અશ્વપટ્ટસ્ય ચન્દ્રાય માયાસૂર્યાય તે નમઃ ॥ ૬૫॥

સ્મૃદ્ધિદાય વિરાગાય સર્વહર્ત્રે ચ તે નમઃ ।
એષાઽહઙ્ગૃહસંજ્ઞાઽસ્મિ ગૃહં સત્યં ભવાન્મમ ॥ ૬૬॥

રક્ષાઙ્ગારકનામા ત્વં ત્વત્પરા ગીશ્ચ યાવતી ।
ત્વાં સહાયં પરં પ્રાપ્ય જુહોમ્યેનાં ગૃહાણ મામ્ ॥ ૬૭॥

વિદિત્વા ચાઽવિદિત્વાઽપિ સર્વં જુહ્વતિ ચાન્તતઃ ।
ઉભયેન વિધાનાઽત્ર હોમો ભવામિ વૈ ત્વયિ ॥ ૬૮॥

ત્વં યજ્ઞસ્ત્વં યજ્ઞકુણ્ડે ચાહવનીયરૂપવાન્ ।
ગાર્હપત્યસ્વરૂપસ્ત્વં ચાવસથ્યસ્વરૂપવાન્ ॥ ૬૯॥

યજ્ઞકુણ્ડાગ્નિરેવાઽસિ સર્વકુણ્ડાગ્નિરેવ ચ ।
નય માં સત્યધર્મેણ સતીલોકે કૃપાં કુરુ ॥ ૭૦॥

સતીધર્મો હિ નારીણાં જગદુદ્ધારકારકઃ ।
સતી દાક્ષી પુરા જાતા વહ્નિના ત્વદહદ્વપુઃ ॥ ૭૧॥

રેણુકા ચ સતી જાતા શબરી ચાપિ વૈ પુરા ।
કૃતધર્માશ્રિતા નાર્યઃ સતીત્વમુપયાન્તિ ચ ॥ ૭૨॥

તથાઽહં શ્રીહરે કૃષ્ણ સતીત્વમુપયામિ ચ ।
ઇત્યેવં ભૂપતે સા તુ કોમલાઙ્ગી હિ રાણિકા ॥ ૭૩॥

ચિતામારુહ્ય યાવચ્ચેન્ધિતું વહ્નિં સમિચ્છતિ ।
તાવચ્છ્રીલોમશો દેવશ્ચેશાનશ્ચ સુરાદયઃ ॥ ૭૪॥

અનાદિશ્રીકૃષ્ણનારાયણો લક્ષ્મીશ્ચ ગોચરાઃ ।
અભવન્ સન્નિધૌ તત્ર સતી નેમે સમન્તતઃ ॥ ૭૫॥

સતી ત્વં જયમાપ્નુહિ સતીલોકં પ્રગચ્છસિ ।
પત્યા સમં સુખં ભુઙ્ક્ષ્વ યાવત્ સ્વર્ગં પ્રવિદ્યતે ॥ ૭૬॥

ઇત્યુક્ત્વા પ્રદદુરાશીર્વાદાન્ પુષ્ણાણિ ચન્દનમ્ ।
સતી વિષ્ણું નમસ્કૃત્વા સસ્માર ચ પુનઃ પતિમ્ ॥ ૭૭॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૨૬૭-અધ્યાયાન્તર્ગતં
સતી રાણિકાકૃતં કૃષ્ણનારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૨૬૭/૫૨-૭૭॥

lakShmInArAyaNIyasaMhitA . khaNDa 2. adhyAya 267/52-77..

Proofread by PSA Easwaran

*Sati Ranikakritam Krishnanarayana Stotram*

pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*